बुन्द, इर् ञ उ निशामने। (इति कविकल्पद्रुमः। (भ्वा०-उभ०-सक०-सेट्।) पञ्चमस्वरी। इर् अबुन्दीत्। ञ बुन्दति बुन्दते। निशामनमालोचनं प्रणिधानमिति यावत्। इति दुर्गादासः॥ (यथा, भट्टिः। १४। ७२।
"ससंसे शरबन्धेन दिव्येनेति बुबुन्द सः॥")

बुध, इर् ञ उ निशामने। इति कविकल्पद्रुमः॥ (भ्वा०-उभ०-सक०-सेट्।) पञ्चमस्वरी। इर् अबुधत् अबुन्धीत्। ञ बुन्धति बुन्धते। उ बुन्धित्वा बुद्धा। निशामनमालोचनं प्रणिधानमिति यावत्। इति दुर्गादासः॥

बुन्ध, क बन्धे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) पञ्चमस्वरी। क बुन्धयति॥ इति दुर्गादासः॥

बबुधानः, पुं, आचार्य्यः। देवः। पण्डितः। इति संक्षिप्तसारोणादिवृत्तिः॥ (यथा, ऋग्वेदे। ७। ४४। ३।
"दधिक्रावाणं बुबुधानो
अग्निमुपब्रुव उषसं सूर्य्यं गाम्॥")

बुभुक्षा, स्त्री, (भोक्तुमिच्छा। भुज धौ भक्षे+ "धातोः कर्म्मणः समानकर्त्तृकादिच्छायां वा।" ३। १। ७। इति सन्। ततः "अः प्रत्ययात्।" ३। ३। १०२। इत्यस्ततष्टाप्।) क्षुधा। इत्यमरः। २। ९। ५४॥ (यथा, रामायणे। २। २८। १८।
"अतीववातस्तिमिरं बुभुक्षा चास्ति नित्यशः।
भयानि च महान्त्यत्र ततो दुःखतरं वनम्॥")

बुभुक्षितः, त्रि, (बुभुक्षा भोजनेच्छा सञ्जातास्य। बुभुक्षा+"तदस्य संजातं तारकादिभ्य इतच्।" ५। २। ३६। इति इतच्।) क्षुधितः। इत्यमरः। ३। १। १०॥ (यथा, मनुः। १०। १०५।
"अजीगर्त्तः सुतं हन्तुमुपासर्पद्बुभुक्षितः।
न चालिप्यत पापेन क्षुत्प्रतीकारमाचरन्॥")

बुल, क मज्जने। इति कविकल्पद्रुमः॥ (चुरा०-पर०-अक०-सेट्।) क बोलयति प्रस्तरः पयसि। तालव्यवर्गाद्यादिरयमिति केचित्। इति दुर्गादासः॥

बुलिः, स्त्री, (बुल+इन् किच्च।) भगम्। इति हेमचन्द्रः। ३। २७३।

बुषं, क्ली, (बुष्यते उत्सृज्यते यत्। बुसिर् उत्सर्गे+"इगुपधेति।" ३। १। १३५। इति कः। पृषोदरादित्वात् षत्वं विभाषया।) बुसम्। तुच्छधान्यम्। आगड़ा इति भाषा। यथा,—
"उन्मेषमेषतुषतोषभवाभिलाषकुक्षाषमाषबुषवेषतुषाररोषाः। इति सर्व्वंषमध्ये पुरुषोत्तमः।
इति भरतः॥

बुस, य इर् त्यागे। इति कविकल्पद्रुमः। (दिवा०-पर०-सक०-सेट्।) य बुस्यति जलं मेघः त्यजतीत्यर्थः। इर् अबुसत् अबोसीत्। अस्मात् पुषादित्वान्नित्यं ङ इत्यन्ये। इति दुर्गादासः॥

बुसं, क्ली, (बुस्यते तुच्छत्वादुत्सृज्यते इति। बुस इर् उत्सर्गे+"इगुपधज्ञाप्रीकिरः कः।" ३। १। १३५। इति कः।) तुच्छधान्यम्। आगड़ा इति भाषा। तत्पर्य्यायः। कड़ङ्गरः २। इत्यमरः। २। ९। २२॥ बुषम् ३। इति भरतः॥ बूषम् ४। इति शब्दरत्नावली॥ (उदकम्। यथा, ऋग्वेदे। १०। २७। २४।
"आविः स्वः कृणुते गूहते बुसम्॥"
"बुसमुदकम्॥" इति सायनः॥)

बुस्त क अनादरे। आदरे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) क बुस्तयति खलं लोकः। बुस्तयति धीरं साधुः। इति दुर्गादासः॥

बुस्तं, क्ली, (बुस्यते अनाद्रियते यत्। बुस्त क अनादरे+घञ्। यद्वा बुस्यते त्यज्यते स्म इति। बुस इर उत्सर्गे कर्म्मणि क्तः।) मांसपिण्डकविशेषः। स्थालीभृष्टमांसम्। पनसादिफलस्य असारभागः। इत्यमरभरतौ॥ भोँता इति ख्यातः॥

बूकं, त्रि, (बुक्कयति शब्दायते इति। बुक्क+अच्। पृषोदरादित्वाद्दीर्घः।) बुक्कम्। हृदयम्। इत्यमरटीकायां रमानाथः॥

बृक्कं, त्रि, (बुक्कयति शब्दायते इति। बुक्क+अच्। पृषोदरादित्वादृकारः।) बुक्कम्। इत्यमरटीकायां सारसुन्दरी॥

बृ ग्रि वृत्त्याम्। भृत्याम्। इति कविकल्पद्रुमः॥ (प्वादि, क्र्यादि०-पर०-सक०-सेट्।) ग्रि बृणोति बूर्णः बूर्णिः। इति दुर्गादासः॥

बेकटः, पुं, मत्स्यभेदः। तरुणः। विदूषकः। इति शब्दरत्नावली॥

बोकड़ी, स्त्री, वस्तान्त्री। इति राजनिर्घण्टः॥

बोद्धा, त्रि, (बुध्यते यः। बुध्+तृच्।) बोधकर्त्ता। यथा,—
"बोद्धारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः।
अबोधोपहताश्चान्ये जीर्णमङ्गे सुभाषितम्॥"
इति भर्त्तृहरिः॥

बोधः, पुं, (बोधनमिति। बुध्+भावे घञ्।) ज्ञानम्। इति त्रिकाण्डशेषः॥ (यथा मार्कण्डेये। २६। ३।
"वर्द्धमानं सुतं सा तु राजपत्नी दिने दिने।
तमुल्लापादिना बोधमनयन्निर्ममात्मकम्॥"
अयं हि बुद्धेर्जातः। तथाहि मार्कण्डेये। ५०। २७।
"बोधं बुद्धिस्तथा लज्जा विनयं वपुरात्मजम्।
व्यवसायं प्रजज्ञे वै क्षेमं शान्तिरसूयत॥"
ऋषिविशेषः। यथा मार्कण्डेये। ७६। २८॥
"तयात्र सुक्तो हैमिन्या गृहीत्वा च सुतश्च सा।
बोधस्य द्विजमुख्यस्य गृहे नीतवती पुनः॥"
सूर्य्यरूपभेदः। यथा, मार्कण्डेये। १०१। १९।
"बोधश्चावगतिश्चैव स्मृतिर्विज्ञानमेव च।
इत्येतानीह रूपाणि तस्य रूपस्य भास्वतः॥"
जागरणकालः। चैतन्यम्। यथा, मार्कण्डेये। ८१। ६७।
"प्रबोधञ्च जगत्स्वामी नीयतामच्युतो लघु।
बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ॥")

बोधकः, पुं, (बोधयतीति। बुध्+णिच्+ण्वुल्।) सूचकः। इति शब्दमाला॥ पुस्तकान्तरे बाधकोऽपि पाठः। बोधजनके त्रि॥ (यथा, साहित्यदर्पणे। २। ४।
"वर्णाः पदं प्रयोगार्हानन्वितैकार्थबोधकाः॥")

बोधकरः, पुं, (करोतीति करः। कृ+ट। बोधस्य प्रबोधस्य करः।) निशान्ते बोधकारकः॥ तत्पर्य्यायः। वैतालिकः २। इत्यमरः। २। ८। ९७॥

बोधज्ञः, पुं, (बोधं अभिप्रायं जानातीति। बोध+ज्ञा+क।) अभिप्रायवेत्ता। श्रीकृष्णः। यथा,—
"सर्व्वभावविदां श्रेष्ठो बोधज्ञः कामशास्त्रवित्।
कामिनीं बोधयामास वासयामास वक्षसि॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ५३ अध्यायः॥

बोधनं, क्ली, (बुध्+णिच्+ल्युट्।) गन्धदीपनम्। इति मेदिनी। ने, ९९॥ वेदनम्। विज्ञापनम्। इति बुधधात्वर्थदर्शनात्॥ (उद्दीपनम्। यथा माघे। ६। ३४।
"समयेन तेन चिरसुप्तमनो-
भवबोधनं समबोधिषत॥"
"मनोभवस्य कामस्य बोधनं उद्दीपनं यस्मिन्।" इति तट्टीकायां मल्लिनाथः। ज्ञानम्। यथा, रघौ। ९। ४९।
"परिचयं चललक्ष्यनिपातने
भयरुषोश्च तदिङ्गितबोधनम्॥"
"तेषां चललक्ष्याणां इङ्गितस्य चेष्टितस्य भयादिलिङ्गभूतस्य बोधनं ज्ञानं च करोति।" इति तट्टीकायां मल्लिनाथः॥) दुर्गाया बोधनं यथा। देवीपुराणे।
"इषे मास्यसिते पक्षे कन्याराशिगते रवौ।
नवम्यां बोधयेद्देवीं क्रीड़ाकौतुकमङ्गलैः॥"
अत्र कृष्णादित्वादिषे इत्यपि गौणाश्विनपरम्। अतएव कालकौमुद्यादिधृतम्। यथा,—
"कर्किण्यर्के हरौ सुप्ते शक्रध्वजक्रियाश्विने।
तुलायां बोधयेद्देवीं वृश्चिके तु जनार्द्दनम्॥"
इति॥
बोधयेदिति शेषः। तत्रापि नवमीबोधनं कन्यायामेव तथैव सम्भवात् तेन सिंहार्के तुलार्केऽप्याश्विनत्वेन वाक्यरचना। एवं प्रतिवर्षं कर्त्तव्यत्वादार्द्रादिनक्षत्रालाभेऽपि बोधनादिकार्य्यम्। नक्षत्रयोगस्तु फलातिशयाय। तथा च लिङ्गपुराणम्।
"मूलाभावेऽपि सप्तम्यां केवलायां प्रवेशयेत्।
तथा तिथ्यन्तरेष्वेवमृक्षेषु च फलोच्चयः॥"
यथाह देवलः।
"तिथिनक्षत्रयोर्योगे द्वयोरेवानुपालनम्।
योगाभावे तिथिर्ग्राह्या देव्याः पूजनकर्म्मणि॥"
कृष्णनवम्यामार्द्रायोगो विधौ मन्त्रे च श्रूयते। तथा च लिङ्गपुराणम्।
"कन्यायां कृष्णपक्षे तु पूजयित्वार्द्रर्क्षे दिवा।
नवम्यां बोधयेद्देवीं महाविभवविस्तरैः॥"
चतुर्थपादे गीतवादित्रनिःस्वनैरिति कालिकापुराणे पाठः।
"इषे मास्यसिते पक्षे नवम्यामार्द्रयोगतः।